No. १०२९-घ

Title सौभाग्य तन्त्रे पार्थिवपूजा विधिः

Author

Extent १६ Age

Subject तन्त्रम्

सौभाग्यतंत्र मार्गेण नित्य संध्या पार्थिव
पूजाविधिः

१०२५

१६

॥यादिनेपतितां बिंदुं माघ गभ्रे षुनिक्षिप्तं ॥ तद्दिनात् लिखितो देवं हानवृद्धि दुख सुखं ॥१
भवनेव्यं भवत्से वा नारिकेल फलं बुवत्॥ गतं व्यं गमस्येव गजभुक्तं कपित्थवत्॥२

ये ये पापरतां सुदूषनैं धियाभंदादरा पूतमे देवाचारविसर्गनष्ट हृदयाश्च पूश्नये
सावकादेच क्रमपूर्व तात हृंया पेकौ लिकादूषकासते याऽनुवि नासुप्रमन मप्रयेपी
तीव स्याँ या १ निंदकं चपरं हिंसोभिमातः लोप्यधिकौहिंसः माता च्छालितहस्ताभ्यां जिह्वयापिच निंदकः
निन्दकं च्चापरं हिंसोभिमातः तोप्यधिकोहिंसः माता छालति हस्ताभ्यां जिह्वयापिच निन्दकः १
आराधितोयदि हरि स्तपसा ततः किं नाराधितोयदि हरि स्तपसा ततः किं अन्तर्बहिर्यदि हरि स्तपसा
ततः किं नान्तर्बहिर्यदि हरि स्तपसा ततः किं १ त्वयि प्रसन्ने मम किं गुणेन त्वय्यप्रसन्ने मम किं गुणेन
रक्ते विरक्ते वरेवधने तो वृथा भवेत् कज्जलपत्रभङ्गः १
दोर्भिः खड्गं त्रिशूलं चमर परशु धनुः चर्म बाणांकुशारं शंखं चक्रं च खेटं
हलमुसलगदाभिंडिपालं च पाशं विद्युज्जिह्वं च मुष्टिं ध्वजमथ विभकरं
बिभ्रतं शुभ्रवर्णं वंदे रामं त्रिनेत्रं मम हरिपुकुलं मर्दयन्तं प्रतापैः॥

॥शाद्वलशाद्वल भूमिके कल्पवृक्षवनवाटिसंस्थिते ॥ रत्नमालवलये निवेशिते तत्र वाटि
शातकेन संकुले ॥ निम्बवाटिमणिमण्डपोस्थिते चण्डभानुशतकोटिभास्वरे ॥ अष्टिपंचाशिवमं
चकेपरे शांकराके मणिपीठिकातटे ॥ कादिहादिमनुरूपिणीं शिवां भावयामि परदेवतां ह
दि ॥

ॐ
सौ॰
१

ॐ तत्र श्रीमान् साधकोऽरुणोदये यामे विबुद्धावश्यकं कृत्वा हस्तपादौ च प्रक्षाल्य धौतवा
ससी परिधाय आचम्य स्वासने समुपविश्य पूजाचक्रं निर्माल्यमपकृत्य प्रक्षाल्य स्वपुरतः पी
ठादौ संस्थाप्य पूर्वदिनपूजावशिष्टपुष्पपत्रादिभिर्मूलविद्यया त्रिः पुष्पाञ्जलिनाभ्यर्च्य ।
वक्ष्यमाणक्रमेण शिखां बध्वा च सकृत्पुष्पाञ्जलिं दत्वा स्वशिरसि ब्रह्मरन्ध्रस्थस्वेन सह स्वद
लकमलकर्णिकायां सिंहासने समुपविष्टां माकारणपादुकां रक्तवर्णां रक्तवस्त्रा ।
भरणभूषितां वामकरधृतलीलाकमलां दक्षिणभुजेनालिङ्गितं श्वेतवस्त्राभरणानु
लिप्तं मुक्तादामादिभूषितं च दक्षिणकरे निर्भ्रं त्रिनेत्रं ज्ञानमुद्रापुस्तकवराभयकरं स्मेराननं सु
प्रसन्नं शिवरूपिणं श्रीगुरुं ध्यात्वा तच्चरणारविन्दयुगलविगलदमृतधाराभिः स्वदेहं प्ला
वितं विभाव्य प्रणवत्रितयमुच्चार्य वक्ष्यमाणश्रीगुरुपादुकां तेन श्रीअमुकानन्दनाथश्रीपा
दुकां पूजयामीति मानसैरुपचारैः संपूज्य तन्मलेनाथसमागमं शिवाय गुरुरूपिणे विद्या १

वस्तारसंसिद्धेस्वीकृतानेकविग्रहनवायनवरूपायपरमार्थैकरूपिणे सर्वाज्ञानतमोभेदभा
नवे विद्भानायेत स्वतंत्रायद्यान्ह्रस्वविग्रहाय शिवात्मने परतन्त्रायभक्तानांभव्यानांभव्यरू
पिणे विवेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपि
णे पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यात्तु पर्यधः सदा मच्चित्तरूपेण विधेहि भवदासने इति प्र
पं णम्य दत्तं त्रेण स्वहृदि लिङ्गं भावयेत् इति गुरुध्यानं विधाय स्वमूलाधारे चतुरस्रे वेष्टितं वा
दिसांतवर्णैश्चतुष्टयप्रयुक्तं चतुर्दलपंकजं पीतवर्णं ध्यात्वा तत्कर्णिकायां सोमसूर्याग्निमयम
कथादित्रिरेखं कुलसंज्ञं गःलेत्रिकोणं विभाव्य तन्मध्ये कोटिसूर्यप्रतीकाशं चंद्रकोटिसुशीत
लं जपाकुसुमप्रभं सत्त्वरजस्तमोगुणाक्रान्तकामाख्यबिंदुं विभाव्य तदूर्ध्वं कुंडलिनीशक्तिं
चिद्रूपां महात्रिपंचकलायुक्तरूपां चापाहुणां विग्रहविग्रहरूपिणीं तडित्कोटिप्रभादीप्तां विसतं
तुतनीयसीं प्रसुप्तभुजगीमिव सार्धत्रिवलयेन स्थितां स्वकांडे दंडाहतां कृत्वा उत्थाप्य गरूप

सौ. दिष्टविधिना सुषुम्णामार्गेण मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्रभे
२ दक्रमेण ब्रह्मरंध्रस्थितसहस्रदलकमलं प्रापय्य ततः स्ववदनस्तनधारयारक्तवर्णामयाः कुंडलि
2 नीं तां संतर्प्य पुनः स्रोतः स्वरूपिणीम कुलामृतस्रवेन सुषुम्णामार्गेण तत्तदाधारं तत्तद्धातुत
त्त्वहृणं तत्तदधिदेवताः स्नावयंती मार्ज्जविसृष्ट्यादिक्रमेण मूलाधारे नीत्वा तच्चेव स्थापयेदि
त्यारोहावरोहक्रमेण परां शक्तिं कुंडलिनीं ध्यात्वा विद्याकूटत्रयं ध्यायेत ततो मूलाधारे व
ह्निमंडलं दशकलात्मकं विभाव्य तत्र मूलविद्यायाः प्रथमकूटं वाग्भवाख्यं स्फुरत्तडिल्लता।
भास्वरमनाहतपर्यंतमामनादशिरवं विभाव्य अनाहते सूर्यमंडलं द्वादशकलात्मकं ध्यात्वा
तन्मध्ये मूलविद्यायाः कामराजाख्यं द्वितीयकूटं तद्यादित्यसंकाशं आज्ञान्तं पर्यंतमामनादशि।
खमथ ऊर्ध्वं प्रसृतरश्मिकं ध्यात्वा पुनराज्ञायां सोममंडलं षोडशकलात्मकं विभाव्य तन्म।
ध्ये मूलविद्यायाः शक्तिकूटाख्यं तृतीयकूटं चंद्रकोटिप्रभं ब्रह्मरंध्रान्तर्गतबिंदूर्ध्वमंडलपर्यंतं। २

प्राग्वन्नाडीषिरवं ध्यात्वा ततो मल्लारिविश्वास्त्रं ध्यांतमल्लविद्यामयदिव्यकरसहस्रभास्वरां तेजो
मयीरवं तां ध्यात्वा तत्तेजस्तोम्यामं स्वदेहं परिचिंतयेत्तत्तेजसा परिणता श्रीपरदेवतां हृद
यकमले ध्यात्वा मानसैरुपचारैः पूजयित्वा मल्लविद्यायाः प्राणायामत्रयं मल्लविद्याया
वक्ष्यमाणं ऋष्यादिकरषडंगन्यासं च कृत्वा मल्लविद्यां यथाशक्ति जपित्वा जपं समर्प्य
प्रातर्नमामि जगतां जनन्याश्चरणांबुजं श्रीमत्त्रिपुरसुंदर्या नमितायाहरादिभिः प्रा
तस्त्रिपुरसुंदर्या नमामि चरणांबुजं हरिहरो विरिंचिश्च सृष्ट्यादीन्कुरुते तया प्रातस्त्रि
पुरसुंदर्या नमामि पदपंकजं यत्पादांबु मंभुशिरसि इति गंगामाहुर्मिताः प्रातः पाशांकुशशा
रचापहस्तां नमाम्यहं उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुंदरीं प्रातर्नमामि पादाब्जं ययेदं
भासते जगत् तस्यास्त्रिपुरसुंदर्या यत्प्रसादान्निवर्तते यः श्लोकपंचकमिदं प्रातर्नित्यं पठे
न्नरः तस्मै ददात्यात्मपदं श्रीमत्त्रिपुरसुंदरी इति स्तुत्वा प्रणम्य निजकृत्यं समर्पयेत प्रातः

लो॰ प्रभृति सायांतं मायादि प्रतत्वेन नयन्कोऽसि जनको नेन तद्दत्त नव पजनं इति मम पा स्वकर्मा
३ नुष्टानार्थं देव्याज्ञां प्रार्थयेत् न घन्या त्रैलोक्य चैतन्यमयो महोऽपि श्री संदर्हित्वच्चरणज येव
3 प्रातः समुत्थाय तव प्रियार्थं संसार यात्रामनुवर्तयिष्ये संसार यात्रा मनुवर्तमानं त्वदा
ज्ञया श्री त्रिपुरे परेशि स्पर्धा तिरस्कार कलि प्रमाद भयानि मां माभिभवंतु मातः जानामि
धर्मं न च मे प्रवृत्तिर् जानाम्यधर्मं न च मे निवृत्तिः त्वया हृषीकेशि हृदिस्थया हं यथा नि
युक्तोऽस्मि तथा करोमि इति देव्याज्ञां प्रार्थयित्वा गुरूपदेशेन ज्ञानं सहस्र सिद्धं अजपाज
पं षड्ब्देवताभ्यः समर्पयेत् अथ पर्वे गुरू हो राज्ञो चरितम सक्कासतिः ध्याना त्मकं षट्श
ताधिकमेकविंशति सहस्र संख्याकमजपा जपं मूलाधारस्वाधिष्ठान मणिपूरकानाहा
त विशुद्धाज्ञा ब्रह्मरंध्रेषु चतुर्दल षट्दल दशदल द्वादश दल षोडशदल द्विदल सहस्र दलेषु ३
म स्वर्णविद्रुम नील पिंगल धूम्र विद्युत्कर्पूर वर्णेषु स्थितेभ्यो गणपति ब्रह्म विष्णु रुद्र जीवा

द शाद त

वात्मपरमात्मश्रीगुरुपादुकाभ्योयथाभागतः समर्पयिष्यामीतिकृतांजलिः संकल्प्य स
मर्पयेत् तद्यथा ॐ ऐं ह्रीं श्रीं मूलाधारस्थायगणपतये अजपाजपानां षट्शतानि समर्पया
मि नमः स्वाधिष्ठानचक्रस्थाय ब्रह्मणे अजपाजपानां षट्सहस्राणि समर्पयामि नमः म
णिपूरचक्रस्थाय विष्णवे अजपाजपानां षट्सहस्राणि समर्पयामि नमः अनाचक्रस्था हत
यरुद्राय अजपाजपानां षट्सहस्राणि समर्पयामि नमः विशुद्धचक्रस्थाय जीवात्मने अ
जपाजपानां सहस्रं समर्पयामि नमः ५ आज्ञाचक्रियापरमात्मने अजपाजपानां सह क्रस्थप
स्रं समर्पयामि नमः ६ सहस्रदलकमलकर्णिकामध्यस्थायै श्रीगुरुपादुकायै अजपा
जपानां सहस्रं समर्पयामि इति समर्पयेत् एतावत्कर्तुमशक्तश्चेत् ॐ ऐं ह्रीं श्रीं सर्वाण्येव
गुरहोरात्रचरितमुक्तासनिः श्वासात्मकं षट्शतानाधिकमेकविंशं सहस्रं त्वाकमज
पाजपं ब्रह्मरंध्रस्थसहस्रदलकमलकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै समर्पयामि

सो. नम इति त्रिः देवं एवं समर्पयेत् अथ अजपाजपं समर्प्य ॐ अद्य सूर्योदयमारभ्य अहोरात्रेणोच्छ्वा
४ सनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं सहंकरिष्ये इति
५ कृतांजलिपुटः संकल्प्य अजपामंत्रेण प्राणायामत्रयं कृत्वा स्वशिरसि ॐ ऐं ह्रीं श्रीं हंसः।
त्मने ऋषये नमः मुखे ४ अव्यक्तागायत्रीछन्दसे नमः हृदये ४ परमहंसाय देवतायै नमः
सत्ताधारे ४ हंबीजाय नमः पादयोः ४ संशक्तये नमः नाभौ ४ सोहं कीलकाय नमः हृ
दये ४ ॐकारतत्त्वाय नमः मूर्ध्नि ४ नभसेस्थाय नमः सर्वांगे ४ हेमाभवर्णाय नमः कंठे
४ उदात्तस्वराय नमः इति विन्यस्य मम मोक्षार्थे जपे विनियोगः इति कृतांजलिर्वदेत्।
ततः अंगुष्ठयोः ॐ ऐं ह्रीं श्रीं हंसः सूर्यात्मने स्वाहा हृदयाय नमः तर्जन्योः ४ ह्रीं सोमात्म
ने स्वाहा शिरसे स्वाहा मध्यमयोः ४ ह्रूं निरंजनात्मने स्वाहा शिखायै वषट् अनामि
कयोः ४ ह्रैं निराभासात्मने स्वाहा कवचाय हुं कनिष्ठयोः ४ ह्रौं अनंततनुः सूक्ष्माद ४

५ वौंषट् योनस्वाहा नेत्राय याय वौषट् करतलपृष्ठयोः ॐ ह्रः अव्यक्तबोधात्मने स्वाहा अस्त्रा
यफट् इति करयोर्विन्यस्य हृदयादिष्वेतानेव मंत्रान्विन्यस्य ध्यानं कुर्यात् नयथाब्रह्मांडमर्धा
नेयस्य विप्रावर्द्धति खं वैनाभिश्चंद्रसूर्यौ च नेत्रे दिशिः श्रोत्रं यस्य पादौ क्षितिः च ध्यानव्यासोम
वेभ्र तां नतोऽस्म्यहम् इति विराट्स्वरूपस्यात्मनो ध्यात्वा तदनुसंधायी प्राणवायोर्निर्गमप्रवेशात्मक
मजपामंत्रं हंसः षट्पंचविंशति गायत्रीं जपित्वा समर्प्य गुरुपरिहासमार्गेणानाद्यनुसंधानपूर्वकं निर
लसमस्तोपाधिनाकेनापि विद्विलासेन प्रवर्तमानोऽस्मीति विभाव्य स्वकार्यानुष्ठानाय ॐ समु
द्रमेखले देवि पर्वतस्तनमंडले विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य ॥
ग्रामान्नसारेण नमस्यापादं निधाय योन्याय पदे पदे समुच्चरन् गृहाद्बहिर्निर्गत्य ग्रामाद्बहिर्नै
ऋत्यां याम्यां वा दिशि शरक्षेपमात्रं भुवमतीत्य मलमूत्रोत्सर्गं शौचाचमनादिकं यथाविधि वि
धाय प्रातिर्विप्रेषु दिनेषु विहितकाष्ठेन क्लींकामदेवाय सर्वजनप्रियाय नमः इति मंत्रेण दं

सौ॰ नात्विशोध्यजिह्वां संलिख्य दंतकाष्ठं प्रक्षाल्य पुरतः सुहृद्देशे परित्यज्य वत्समाणाचनलोत्सीर
५ विद्याभिमंत्र्यं प्रक्षाल्याचम्य तिलकुशाक्षतसमगंधान्वितान् अभिमंत्रितपांकूनाम्रुचिस्थानाद्गुह्य
नमस्कृत्य मयथोतनवस्त्राणपादायतनघाटे गत्वा मृत्स्नाभिमंत्रितवारिणा तीरे गत्वा प्रक्षाल्य तन्मृ
5 त्स्नाभिमंत्रितंकुशादिकं निधाय पोहूतजलेन तीर्थाद्बहिः कटिशौचं मृद्गंधामलकादिद्रव्यैर्दंत
नादिनामलापकर्षणं स्नानं स्फोमयादिभिः स्वशाखोक्तविधिना वैदिकस्नानं च विधाय ना
भिमात्रे जले स्थित्वा अघौन्यादिश्रीपरदेवताप्रीत्यर्थं तांत्रिकविधिना स्नानमहं करिष्ये ।
इति संकल्प्य मूलविद्यया प्राणायामत्रयं कृत्वा मूलेन ऋष्यादिकरषडंगन्यासं विधा वि
यस्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवेः
तेन सत्येन मे देव तीर्थं देहि दिवाकर इति सूर्यं तीर्थं प्रार्थ्य क्रोमित्यंकुशमुद्रया सर्वमंड
ले भित्वा गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधुकावेरि जलेस्मिन्सन्निधिं कुरु इति स ५

र्यमंडलात्श्रीर्यमाकृष्य तज्जले पुरः कल्पितनीर्थमंडले संयोज्य पुनः सूर्यमंडलादिव ॐ ऐं ह्रीं।
श्रीं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमयेतीर्थेणाक्षिरेह्येहि स्वाहा इति तीर्थे पात्रिमावाह्य तस्मिंस्ती।
र्थमंडले तां ध्यायेत् यथा सर्वानंदमयीमत्रैवभुडरिनधे सास्रगांकप्रभां आज्ञाबोधकरां द्वयेन
दधतीं पाशांकुशौ चक्रमानत् दोर्भ्यां चामरनपर्णहेमकलशं सुज्ञानत्नमालांबरां गंगासिंधुस
रिद्वयादि सहितां [illegible] युधध्यानमि श्रीतीर्थपात्रीं भजे इति दत्वाय योद्वयोतायम
धमाभ्यां कलशं दत्त्वा अधःस्थयोरंतरत्नायुधध्यानमिति ध्यात्वा ॐ नमो भगवति अंबे अं।
बालिके ऊं बिके महामालिनि एह्येहि भगवति तीर्थपते तीर्थवल्लवाले ह्रीं श्रीं शिवजटाधिरूढे गं
गं गंगे विके स्वाहेति मंत्रेण सप्तधाभिमंत्र्य ह्रींकारेणालोक्य घवमिति धेनुमुद्रया स्ततो क्र।
म स्थलविशोधाः प्रथमकूटमुच्चार्य आत्मतत्त्वात्मने नमः द्वितीयकूटमुच्चार्य विद्यातत्त्वा
त्मने नमः तृतीयकूटमुच्चार्य शिवतत्त्वात्मने नमः इति तत्त्वत्रयं जले विन्यस्य ततः श्री

सौ॰ चक्रं विभाव्य हृदयकमले देवीमावाह्य षडंगन्यासेन सकलीकृत्य तां सावरणां संतर्पयित्वा मूलवि
६ द्यया योनिमुद्रया तज्जलमष्टधाभिमंत्र्य तस्मिन्स्वदेवतां संस्मरन् एवं कृत्वा त्रीनि मज्जनानि मज्ज्य कुंभमु
6 द्रया मूलविद्यया स्वशिरसि त्रिरभिषिच्य मूलेन देवीं त्रिः संतर्प्य देवीं विसृज्य वक्ष्यमाणप्रका
रेण जलेनाचम्य तीरमागत्य धौतवाससी परिधायाचम्य श्रीपर्ण्यस्त्रिकोणेनोर्ध्वपुंड्रं विधाय चंद
नादिना वा त्रिपुंड्रं विधाय वैदिकसंध्यां निर्वर्त्य तांत्रिकसंध्यां कुर्यात् सा च त्रिविधा ज्ञेया बाला।
कौमारयौवना प्रौढा चेति महादेवि संध्या चतुर्विधा स्मृता प्रातःकाले महादेवि विद्या वागीश्वरी
त्रि मता कामेश्वरी च मध्याह्ने सायाह्ने पुरभैरवी मध्यरात्रे महादेवि ज्ञेया त्रिपुरसुंदरी इति तत्र वि
धिवद्वाचम्य मूलविद्यया त्रिखंडां बद्ध्वा तेषु वर्णप्राणायामत्रयं कृत्वा मूलविद्यया ऋष्या।
दिकरषडंगन्यासान्विधाय स्वपुरतो धेनुमुद्रया जलममृतीकृत्य मूलविद्ययैवाभिमंत्र्य
तेन जलेन कुशैः ककारादिहकारांतैः सबिंदुभिर्मातृकाक्षरैः प्रत्यक्षरं स्वशिरः प्रोक्ष्य मूल। ६

विद्यया च त्रिः प्रोक्ष्य सूर्यमंडले देवीं यथोक्तरूपां ध्यात्वा दक्षिणहस्तेन जलमादाय लं वं रं यं हं इति
पंचभौतिकैर्मंत्रैः समस्तमभिमंत्र्य मूलविद्यया त्रिरभिमंत्र्य तज्जलविंदुभिर्वामांगुष्ठानामिका
भ्यां मूलविद्यया स्वशिरस्त्रिः प्रोक्ष्य अवशिष्टजलं वामहस्ते निधाय तेजोरूपं तज्जलमिडया
कृष्य स्वदेहांतःस्थितं। सकलकल्मषं प्रक्षाल्य तज्जलं कृष्णवर्णं पिंगलया बहिर्निर्ग[illegible]त्वा पुन
र्दक्षिणहस्ते कृत्वा स्ववामभागे ज्वलद्वज्रशिलां ध्यात्वा ॐ ह्रीं श्रीं पशु हुं फट् इति पाशुपता
स्त्रमंत्रेण तस्यां शिलायामास्फाल्य हस्तौ प्रक्षाल्य मूलविद्यया जलमादाय प्रवहन्नाड्या सह
स्रदलकमलगतपरमात्मतेजसैकीभूतं विभाव्य निर्गमय्य तेन जलेनामृतमालिनी स्वाहेति मं
त्रेण कुशैः स्वशिरस्त्रिः प्रोक्ष्य ॐ ह्रीं श्रीं प्रथमकूटमुच्चार्य आत्मतत्त्वं शोधयामि स्वाहा द्विती
यकूटमुच्चार्य विद्यातत्त्वं शोधयामि स्वाहा तृतीयकूटमुच्चार्य शिवतत्त्वं शोधयामि स्वाहा पुन
रेतैर्दुपरीतेन त्रिराचम्य समस्तविद्यामुच्चार्य सर्वतत्त्वं शोधयामि स्वाहा इति त्रिधा एवं नव

सौ.
७

धा जलमापानेन त्रिराचम्य जलमंजलिनादाय योन्याय ४ ऐं प्रथमकूटमन्त्रार्थे त्रिपुरे देवि विद्महे क्लीं
ह्रीं त्रीं यकूटमन्त्रार्थ कामेश्वरि धीमहि सौं तृतीयकूटमन्त्रार्थे तन्नः क्लिन्ना प्रचोदयात् श्रीमहात्रिपु
7 रसुन्दरी श्रीपादुकायै पाद्यं स्वाहा इति सर्वाभिमुखमर्घ्यांजलित्रयं दत्त्वा सलिलं विद्युपादेवीशिः
समर्प्य ह्रां ह्रीं सः श्रीसूर्यं तर्पयामि नमः इति त्रिः संतर्प्य सलिलाधारे प्रथमकूटं ज उं कोटिसमप्रभं
सल्लादि ब्रह्मरंध्रांतं संचिंत्य तत्तेजः सुषुम्णावर्त्मना हृत्संधं नीत्वा वहन्नासाधना आकाशाख्यव
ह्निमंडले समावाह्य तत्तेजसोद्भूतां वागीश्वरीं ध्यायेत् पीतां पीतांबरां पीनस्तनीं विभ्रमां धान्यलेपनां न
द्धिकोटिसमाभासां बालां मृदुलस्मरोज्ज्वलां पुस्तकाक्षकरांभोजां वह्निपीठनिषेदुषीं वाग्देवीं वाङ्म
योद्भूतां त्रीलं एं सस्मितां स्मरेत् इति ध्यात्वा आकाशाख्य वह्निमंडले ध्यात्वा ४ प्रथमकूटमन्त्रार्थे त्रिपु
रा वागीश्वरी पादुकां पूजयामि इति गंधपुष्पाद्यैस्त्रिः संपूज्य पुनः ४ वन्दमानां वाग्भवगा
यत्री मन्त्रार्थे त्रिपुरा वागीश्वरी श्रीपादुकायै पाद्यं कल्पयामि स्वाहा इति त्रिरर्घ्यांजलिं दत्त्वा ७

पपुस्तस्यैव ६ प्रथमकूटमुच्चार्य त्रिपुरावागीश्वरी श्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य
श्रीगुरुं प्रणम्य एवं कृत्वा प्राणायामं ऋष्यादिकरषडङ्गन्यासान्विधाय मातृकान्यासं स्थानेषु प्राण
त्रितार मूलविद्यानित्याविद्या ह्स्ऽं नमः इत्यादिमातृकाविन्यस्य ऐं क्लीं गायत्रीं यथाशक्ति
जपित्वा वाग्भवकूटगायत्रीं जपेत् सा यथा ऐं त्रिपुरे देवि विद्महे वागीश्वरी धीमहि तन्नो मुक्लि
प्रचोदयात् इति वाग्भवगायत्रीं यथाशक्ति जपेत् ततो मूलविद्यां प्रातर्नित्यं जपेत् तत्रा
पञ्ची नर्स्लाधारगते कमले वह्निमंडले वाग्बीजरूपां नित्यां तां विद्युत्पटलभासुरां पुष्पबाणेक्षु
कोदंडपाशांकुशमस्कारां स्वेच्छारूढां नवपुष्पपुरां नित्यां तत्प्रणामात्मिकां ह्रीकारवर्णेन पता रा
ॐ पोतः स्रोजलीनपञ्च ध्यानमकाचवं करान्वाग्भवो पास्तिन्यवात् नववर्णं स्मरेन्मूलपंकजे
योनिमंडले हल्लाथाः कामारमदसो धकरयं पंचमायुध ध्याननित्यां संध्याचक्ररूपेपि इति
ध्यात्वा हृतनित्याविद्यार्थयामूलविद्याह्सः ऐं क्लीं ह्रूं ह्रूं ह्रूं ह्स्रं ह्रीं श्रीप्रकाशानंद
५७

मूलं दिननित्याविद्यामुच्चार्य तं थं दं धं नं ह्रीं श्रीं श्री प्र[illegible]नंदनाथ ०

सौ नाथरूपिणी श्री महात्रिपुरसुंदरी श्रीपादुकां पूजयामि मूलं विद्यामुच्चार्य आवहितनित्यावि
८ द्यां लृं ॡं एं ऐं ओं औं अं अः ह्रीं श्रीं विमर्शानंदनाथ श्रीपादुकां पूजयामि मूलं दिननित्याविद्या
९ मुच्चार्य कं खं गं घं ङं ह्रीं श्रीं आनंदानंदनाथ श्रीपादुकां पूजयामि मूलं दिननित्याविद्यामुच्चार्य
चं छं जं झं ञं ह्रीं श्रीं ज्ञानानंदनाथ श्रीपादुकां पूजयामि मूलं दिननित्याविद्यामुच्चार्य [illegible] दं धं नं ह्रीं
श्रीं श्री [illegible]नंदनाथरूपपादुकां पूजयामि मूलं दिननित्याविद्यामुच्चार्य पं फं बं भं मं ह्रीं श्रीं श्री स
भावानंदनाथरूपपादुकां पूजयामि यं रं लं वं ह्रीं श्रीं प्रतिभानंदनाथरूपिणी श्रीपादुकां पूजयामि।
मूलं दिननित्याविद्यामुच्चार्य शं षं सं हं ह्रीं श्रीं सुभगानंदनाथरूपिणी श्रीमहात्रिपुरसुंदरी पा
दुकां पूजयामि इति तं ववनाथात्मकेन मूलविद्यां जपित्वा त्रुटिकालपरायणत्वेन षष्टिजपं कु
र्यात तदुक्तं नेत्रतंत्रे आरभ्य मात्रामुदयमेकशो त्रुटिकाक्रमात एकैकं मातृकावर्णाः पंचा
शत्परिवर्तिनाः द्विवेदैः पंचभिस्तुल्याः षडाहत्रिरुद्रीरितात तस्या मातृकाया अथ मर्धः चत। ८

र्षेष्वपि युगे युगुणां प्रतिदिने मकारो लुप्यते इति एकैकस्य घटिकां पर्यंतमेकस्मिन्नेकस्मिन्नस्तो विसर्गस
रहितेषु पंचाशद्वर्णेषु क्रमेण प्रत्यहं लुप्तेषु एकपंचाशद्घटिकायां पुनरकारमारभ्य क्रमेणाव
शिष्टघटिकादशकेन ळकारान्तं पर्यंतं द्वितीयदिने सोदयकाले पकारमेत्योदेति एवमेव कए
कारात् ळकारान्तेषु देति पुनः ककारादिं चटशब्दात्मककारादि एकारान्तानां च वर्णान्यर्यन्तं पुनस्तृती
यदिने चकारं प्राप्योदेति इत्येवं पुनः पंचमीदिने मोक्षकायाः षड्... गतत्रिर्भवति षष्ठे दिने पु
नरकारं प्राप्य सूर्योदेतु पुनः पुनरस्तोरेषु पर्येतीति तत्र अकारः प्रदर्शनेन तत्राकारादि ळकारान्तं ।
पंचाशद्वर्णा विसर्गरहिताद् शाद् प्रभूत्वा पंचवर्गाः अत एव तत्पदानां मातृकाभवन्ति षष्टिशतयः का
र्यः तत्प्रकारस्तु मलं अ आ इ ई हंसः अ ६ मलं अ आ इ ई हंसः ॥ एवं तत्तानाम्ये चाशद्वर्णावत्त्रेषु
नरादिवर्णमावर्तयेत् एवं षष्टिमावर्तयोगमलविद्यापाभवंति द्वितीयदिने ६ मलकः आ इ ई हंसः ।
एवं पुनस्तथाजन्माये एवं तत्तानां चतस्रोवर्णानावर्त्य पुनरावृत्य द्वितीयवर्णानामावर्तयेत एवं षष्टि

सो॰ तावर्तयेः अतीयदिने ५ मल्लेरव आईं ह्रूं सच एवं तां तां त्रीन् वर्णान् आवर्त्य पुनरा द्यां त्रीन् आवर्तयेत् ए
९ वं षष्टिरावर्तयो मल्लविद्या यो भवन्ति चतुर्थदिने ५ मल्लेग आईं ह्रूं मत एवं तानो द्वौ वर्णौ आ
9 वर्त्य पुनराद्यो अन्तरौ वर्णौ नावर्तयेत् एवं ६० पंचमदिने ५ मल्लेघ आईं ह्रूं मः ध एवं तान् वर्णान्
त्यार्य पुनरकारा द्या द्यातान्यं चाश हृणां नावर्तयेत् एवं ६० एवं ङकारादिनत्वा द्वं आईं पल्लवि।
ते कृत्वा घटिकापारायणं कुर्यात् एवं पंचके पंचकोक्रम कूटदीपः अथ वाम ल्लविद्यानदिन
नित्या विद्यां ते हंसः अ ५ मल्लविद्यानहेन नित्याविद्यांते हंस आईं त्यादि श्रीगुरुपदिपादो
वद्घटिकापारायणं कुर्यात् इति घटिकापारायणाख्यः षष्टिजपश्च आधुनावर्तमानसमयेसा
धकैः ज्योतिःशास्त्रोक्तमकारेण हर्गणात् यावत्कलियुगस्य गतदिनानि ज्ञात्वा स्तुक्रमारंभदि
नपर्यन्तं गणयित्वा पंचभिराहृत्या चारितदिने व देयात्तं ज्ञात्वा यस्मिं दिने अकारादि पात्तरंभ
वति तस्मिं दिने प्रारंभो क्रमेण घटिकाः ५ ततस्तद्दिन नित्याविद्यां य षाणक्तिजपेन इति। ९

कालिनित्याजपः ततो मूलादिब्रह्मरंध्रांतमुद्यन्तूर्यसहस्रसमानप्रभां ध्यायेन्मूलविद्यां श्रेष्ठो
त्ररूपां तज्जपित्वा बहिराकाशस्याग्निमंडले पूर्वोक्तरूपां वाग्भवेश्वरीं ध्यायेत् वाग्भवकूटमष्टो
त्तरशतं जपेत् ततः प्राणायामाकारपरायणो कार्यमिति त्रयं करन्यासादिकरषडंगन्यासौ मूलकू
टं जपं देव्यै निवेद्य प्रणम्य स्तुत्वा सूर्यमंडलात् हृन्मंडलात् मूलदेवीं वाग्भवेश्वरीं च सहस्रदि
मूलाधारे च विसृज्य श्रीगुरुं प्रणमेदिति प्रणमेदिति प्रणमेदिति प्रातःसंध्याविधिः हृद्याम
लेदीप्ताकालेपयारूपं स्वस्यानुग्रहकर्तृणीं ध्यायेत् तेनेन भावेन ध्यायन्नाह्निकमाचरेदिति गुरो
रितिशेषः एतत्कृत्वा ततः प्रातःस्मरणानि विक्रमस्थले भुज्जेयं प्रातःसंध्योपमीशानि सर्वकर्मसु
सर्वदा कर्तव्या मंत्रिणा नित्यं मंत्रसिद्धिसमृद्धये प्रातःसंध्यां परित्यज्य कर्म कुर्याद्दुर्जन्मधः।
प्रातःसंध्यापरित्यज्य देवतापूजनं चरेत् अस्पृष्टः सद्गुराचारः सर्वकर्मबहिष्कृतः प्रातः
संध्यापरित्यज्य देवतापूजनं चरेत् मोहाद्वा कृत्वा महापापानि नारकीजपनेनरः प्रातःसंध्यां

सौ. परित्यज्य होमं वा(न)र्पणं शिवे कुर्वन्नकारणं विप्रस्त्यजेत्स्याचोपजायते पिशाचो जायते देवि श्रुति
१० वेदान्तपारगः संध्यानामपि सर्वासां प्रातःसंध्या गरीयसी तस्मात्तां त्यजेद्धि प्रस्वजेन्नरकमाप्नु
10 यात् इति त्रिपुरार्णववचनात् तस्मादियमवश्यं कर्तव्येति शिवशासनं अथ मध्यंदिने।
संध्यात्र प्राणायामादि सूर्यतर्पणं प्रातःसंध्यावदेव विधाय वीजसंध्यां कुर्यात् तद्यथात्र म
ध्याह्ने अनाहतचक्रेसल्लविषयाकामराजकूटेरक्तवर्णां ध्यायेत् सत्तेजःसुषुम्नमार्गेणाव हि
र्गतां सा पुष्टाध्वनानि स्मार्यसूर्यमंडले समावाहितडुरूतां कामेश्वरीं ध्यायेत् तद्यथा रक्तांबर स रक्ता
भूषणाढ्यां पाशांकुशाभीतिवरांदधानां शुचिस्मितां मधुरदृष्टपोवनाढ्यां कामेश्वरीं संस्मरत।
त्रिनेत्रां इति ध्यात्वा कामराजकूटमुच्चार्य श्रीत्रिपुराकामेश्वरीश्रीपादुकां पूजयामि इति त्रिः
संपूज्य पुनः ३ कामराजकूटगायत्रीमुच्चार्य श्रीत्रिपुराकामेश्वरीपादुकायै गृहाणं परिकल्पया
मि स्वाहा इति त्रिरर्घ्यांजलिमुत्क्षिप्य पुनः कामराजकूटमुच्चार्य श्रीत्रिपुराकामेश्वरीश्रीपा १०

दुकां तर्पयामि नम इति त्रिः संतर्प्य प्राणायामादिपुरस्सरं एवं वत्मान्यकां विन्यस्य एवं चतुरीयविद्या
गायत्रीं जपित्वा कामराजकूटगायत्रीं जपेत् तद्यथा ३ क्लीं त्रिपुरादेवि विद्महे कामेश्वरी धीमहि
तन्नः क्लीं न्नः प्रचोदयात् ३ इति कामराजकूटगायत्रीं यथाशक्ति जपित्वा षट्त्रिंशत्तत्त्वात्मकत्वेन
मूलविद्यां जपेत् तद्यथा तत्र मध्याह्ने हृदयांभोजकर्णिकां सूर्यमंडले कामराजात्मिकां देवीं म
लक्तकसमारुणां प्रसूनबाणपुंड्रेक्षुचापपाशांकुशान्वितां परितस्सर्वान्तसख्याभिः षट्त्रिंशत्त
त्त्वशक्तिभिः रक्तमाल्याम्बरालेपभूषाभिः परिवारितां योगनित्याहृत्संपीठचटिकावशगां स्मरेत् पु
ष्पबाणेक्षुकोदंडधराः पाशांकुशधराः हृत्पंकजे च ताः कामराजोपास्तिपरायणा इति देवीं ध्या
त्वा ४ मूलविद्यादिनित्याविद्या हंसः पंचोच्चार्य श्रीशिवतत्त्वरूपिणी श्रीमहात्रिपुरसुंदरी श्री
पादुकां पूजयामि ४ मू॰ दि॰ हंसः कं शक्तिरूपिणी श्रीमहात्रिपुरसुंदरी श्रीपा॰ ४ मू॰ दि॰ हंसः खं
सदाशिवतत्त्वरूपिणी श्री॰ पा॰ ४ मू॰ दि॰ हंसः गं ईश्वरतत्त्वरूपिणी श्रीपा॰ ४ मू॰ दि॰ हंसः घं शुद्ध॰

सौ· विद्यातत्वरूपिणीश्री· पां·वमलं दिनहं हंसः ङं मायातत्वरूपिणीश्री· पा· ६ म·दि· हंसः चं कलात
११ त्वरूपिणीश्री पा· ६ म· दि· हंसः छं विद्यातत्वरूपिणीश्री· पा· ६ म· दि· हंसः जं रागतत्वरूपि
णीश्री· पा· ६ म·दि·हंसः झं कालतत्वरूपिणीश्री· पा· ६ म· दि· हंसः ञं नियतितत्वरूपिणी
श्री· ६ म· दि· हंसः टं पुरुषतत्वरूपिणीश्री· पा· ६ म· दि· हंसः ठं प्रकृतिरूपिणीश्री· पा·
६ म· हंसः डं अहंकारतत्वरूपिणीश्री· पा· ६ म·दि· हंसः ढं बुद्धितत्वरूपिणीश्री· पा· ६
म·दि· हंसः णं मनस्तत्वरूपिणीश्री· पा· ६ म·लं दि·हंसः तं श्रोत्रतत्वरूपिणीश्री· पा· ६ म·
दि· हंसः थं त्वक्तत्वरूपिणीश्री· पा· ६ म· दि· हंसः दं चक्षुस्तत्वरूपिणीश्री· पा· ६ म·दि·
हंसः धं जिह्वातत्वरूपिणीश्री· पा· ६ म·दि·हंसः नं घ्राणतत्वरूपिणीश्री पा· ६ म·लं दि·
हंसः पं वाक्तत्वरूपिणीश्री· पा· ६ म·दि· हंसः फं पाणितत्वरूपिणीश्री· पा· ६ म· दि· हं
सः बं पादतत्वरूपिणीश्री· पा· ६ म·दि·हंसः भं पायुतत्वरूपिणीश्री· पा· ६ म·दि· हंसः मं ११

ऽ उपस्थतत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः पं पायुतत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः रं
स्पर्श तत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः लं रूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः वं रसतत्त्व
रूपिणीश्री पा. ४ स्ह्रिं ह्रं सः गं गंधतत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः खं आका
तत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः यं वायुतत्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः हं तेजस्त
त्त्वरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः लं जलरूपिणीश्री. पा. ४ स्ह्रिं ह्रं सः लंः पृथ्वीतत्त्व
रूपिणीश्री पा. इति षट्त्रिंशत्तत्त्वयोगेन मूलविद्यां जपित्वा प्राणवल्लरलविद्या मूलोत्त
रपातेवारं जपित्वा हृदयकमले कामराजकूटं वालार्ककोटिप्रभं हृदयादिब्रह्मरंध्रान्तं हृद
यादिमूलाधारान्तं च व्यापकं दग्वकं ध्यायेत् मन्नकूटं मणिपूर पानवारं जपित्वा प्राणाया
मादि एवं कं जपं समर्प्य स्तुत्वा प्रणम्य मूलदेवं कामेश्वरीं च प्राग्वध्दृदये विसर्जयेदिति मा(
धाह्नसंध्याविधिः अथ सायंसंध्याविधिः प्राणायामादि सूर्यतर्पणांतं प्राग्वद्विधाय वीत

सौ· १२ संध्यांकुर्यात् तद्यथा सायमात्ताचक्रे तत्त्वाग्रे चंद्रमंडले मल्लविद्यायास्त्रीयंकूटं स्फुटस्फटि।
कसंकाशं ब्रह्मांध्रस्य पर्णेदुमंडलपर्यंतं ध्यात्वा वह्निना मा पुटेनाकाशस्य सोममंडले समा
वाह्यानइंदुनांदेवीं वृद्धां ध्यायेत शुक्लां शुक्लाम्बरालेपस्त्रग्विभूषा विभूषितां जराजर्जरध
र्णां नेत्रत्रयोद्भासिमुखांबुजां ईषत्स्फुरितदंष्ट्रां च भैरवीरूपामास्थितां जरापलितसं।
कीर्णां लम्बमानपयोधरां पाशांकुशौ पुस्तकं च स्फुरितं कदत्तस्रजं करैः दधानां शाक्तिकी।
ज्ञोक्तां पर्णेदुमंडलेस्थितां आद्यापरापरां शाक्तिं शक्तिमद्भिर्निषेवितां भागमेतत्प्रदां
शांतांमनेनातमस्तेस्वरी जपात्सूर्य्यपात्राद्यानदाद्यधःस्ययां तंत्रमुद्रायुधध्याने इति ध्या
त्वा मल्लविद्यायास्त्रीयकूटमच्चार्यत्रिपुरामस्तेस्वरी श्रीपादुकां पूजयामीति गंधादिभिः
त्रिसंपूज्य वत्समात्तातीयकूटगायत्रीमच्चार्यत्रिपुरामस्तेस्वरी श्रीपादुकायै अर्घ्यं कल्प।
यामि स्वाहेति त्रिरर्घ्यं दत्वा पुनस्तत्तीयकूटमच्चार्यत्रिपुरामस्तेस्वरी श्रीपादुकां तर्पयामि १२

नम इति त्रिः संतर्प्य प्राणायामादि एर्वकं तर्प्य विद्यायामाय श्रीप्रासवज्रपिन्वा शाक्तिकूटगाय
श्रीजपेत् सायपा ४ सौं त्रिपुरेदेवि विद्महे शक्तीश्वरी धीमहि तन्नोऽस्ते प्रचोदयात् इति
शक्तिगायत्रीमष्टविंशतिवारं जपित्वा सायाह्ने षोडशनित्यात्मकत्वे स्मलविद्यां जपेत् नद्य-
द्या सायमाज्ञासरोजस्य चंद्रं चंद्रसमद्युति शक्तिबीजात्मिकां चापबाणपाशांकुशान्वितां पु-
परा गं नित्याद्नरां देवीं चंद्रिकां चरणांचिंतयित्वा भगवतीं नित्याभिः परिवारितां पुस्तके चाद-
स्य चेच्चद्धानाः स्मेरवक्त्रकाः नित्याः षोडश चात्तायामायं कालेन संस्मरेत् इति देवीं ध्या-
त्वा स्मलेदिननित्याविद्यां चोच्चार्य श्रीकामेश्वरीनित्याविद्यामुच्चार्य श्रीकामेश्वरीनित्यावि-
द्यारूपिणीश्रीत्रिपुरसुंदरीश्रीपादुकां तर्पयामि नमः ४ स्रः ह्रिं हसः ओं भगमालिनीवि-
द्यामुच्चार्य श्रीभगमालिनीनित्यारूपिणीश्री·पा· ४ स्र·ह्रिं· हेसः ॐ भेरुंडाविद्यामुच्चार्य भे-
रुंडानित्यारूपिणीश्री·पा· ४ सह्रिं· हसः ॐ वह्निवासिनीविद्यामुच्चार्य ॐ वह्निवासिनीनि-

ॐ नित्यक्लिन्नाविद्यामुच्चार्य ॐ नित्यक्लिन्नानित्यारूपिणीश्रीपा·४ स्रःह्रिंहसः

सौ न्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ ॐ महावज्रेश्वरी विद्यामन्त्रार्थे ॐ वज्रेश्वरी नित्यारूपिणी श्री
१३ पा॰ स॰दि॰ हं स॰ क्रें शिवदूती विद्यामन्त्रार्थे क्रें शिवदूती नित्यारूपिणी श्रीपा॰ स॰दि॰ हं
13 स॰ क्रें त्वरिता विद्यामन्त्रार्थे क्रें त्वरिता रूपिणी श्रीपा॰ ७ स॰ दि॰ हं स॰ ल्रं कुलसुंदरी विद्या
मन्त्रार्थे ल्रं कुलसुंदरि नित्या रूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ ल्रं नित्या विद्यामन्त्रार्थे ल्रं नित्या
विद्या रूपिणी श्रीपा॰ ७ स॰ दि॰ स॰ पं नीलपताका विद्यामन्त्रार्थे पं नीलपताका रूपिणी
श्रीपा॰ ७ स॰ दि॰ हं स॰ पें विजया विद्यामन्त्रार्थे पें विजया नित्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं॰
स॰ ॐ सर्वमंगला विद्यामन्त्रार्थे ॐ सर्वमंगला नित्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ ॐ ज्वा॰
लामालिनी विद्यामन्त्रार्थे ॐ ज्वालामालिनी नित्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ श्रं चित्रा
विद्यामन्त्रार्थे श्रं चित्रा नित्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ ग्रः मलपंचदशी विद्यामन्त्रार्थे॰
ग्रामलपंचदशी नित्यारूपिणी श्रीपा॰ ७ स॰दि॰ हं स॰ श्रीमहात्रिपुरसुंदरी नित्यारूपिणी १३

चाणं वे द्नमयंप्रस त्र्वविम रवपाशां कुलौ ऋत्कं मातृका न्द्रा मशे सं मलियवेणप्रशेत्र ह्यं हस्ताभ्यां वरदाभयेद्धूदधतीं
ब्रह्माद्दिशावांश सिंदुरारुणविग्रहां भगवतीं श्रीचा दशी मामये

श्रीपादुकां पूजयामि इति षोडशनित्यात्मकत्वेन जपित्वा सर्वत्र कालनित्याविद्यां सकलविद्यो
च जपित्वा मूलमध्यादि ब्रह्मरंध्रांतं त्रुटीपक्षे टंकार चंद्रनिभं ध्यायन् प्रणतारं शतवारं तां तीयपक्षे टे
जपेत् ततः प्राणायामपूर्वकं जपसमर्पणं कृत्वा देवीं प्राणमयस्वर्यमंडलादेवीं सरस्वती स्व
री हृदि मूलमध्ये च विसर्जयेदिति नित्यसायंसंध्याविधिः ततोर्धरात्रे तुरीयसंध्यामुपासीत सायं
ध्या ऽर्कमंडले देवीध्यानं विना प्राणायामाद्याचमनपर्यंतं सर्वं विधाय सहस्रारकम
ले तुरीयबीजं सकलविद्यात्रयोदशाक्षरं रूपं पञ्चाशत्तमप्रभं ध्यात्वा बद्धांजलिपुटेन तार
कमंडलाद्बहिः परमाकाशे समावाहितं डुरुतां भगवतीं यथोक्तरूपां ध्यायन् तुरीयबी
जमुच्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकां पूजयामि त्रिः संपूज्य पुनस्तुरीयगायत्रीमु
च्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकार्घ्यं कल्पयामि स्वाहेति त्रिरर्घ्यं दत्वा पुनस्तुरीय
बीजमुच्चार्य श्रीमहात्रिपुरसुंदरी श्रीपादुकां तर्पयामीति त्रिः संतर्प्य प्राणायामादि सर्वं

१५ श्रीकोनवाद्रिंदुसहस्रानुयुक्ते कलिर्भवत्यहर्गणो व्यतीतः कल्पाद्यब्दगणं प्रभाकरहृतं वैशाखादिमासैर्युतः त्रिस्थः स्वादि
हृताक्रमयुक्स्वरहृतः लब्धायिमासैर्युतः त्रिघ्नसतिथिदिधाशिवहृतः त्रिस्थो मशोलायुतः

स्त्र्यो सो० केएवोक्तत्वरीयगायत्रीपंचाशाक्षि जपित्वा कालनित्याविद्यामनलविद्यामष्टोत्तरशतवारं त | हीनालब्धादि
पक्ष ४१६ रीयबीजं चाष्टोत्तरशतवारं जपित्वा प्राणायामादि पूर्वकं जपं समर्प्य देवीं लब्ध्वा प्रणम्य देवी | लावमः क्षितानि
परमाकाशात्महृत्पद्मदलकमलकर्णिकायां मन्त्रात्मकामकलारूपमात्मानं ध्यायेदिति त | प्याहैसावनोहर्गं
रीयसंध्याविधिः एतत्संध्याचतुष्टयमेतद्धि योगमकानामावश्यकं बाह्यशाक्तो ध्यानं ह्य | णः ।
मिति अर्धरात्रसंध्योपासनं कार्यमिति अहन्तेद्धुती यदि तत्प्रायश्चित्तार्थमष्टोत्तरशत
मनलविद्यां जपित्वा पुनःकर्मकर्तुमधिकारी भवतीति शिवशासने स्नानसंध्याचतुष्टये नाला
येजपेदष्टोत्तरं शतं इति तत्राज्ञवचनात् जपेन्मनलविद्यामितिशेषः अत्र संध्यालोपो न
कर्तव्यः यम्भोगासैवमेवहि दीक्षितः संध्याहीनो नदीक्षाफलमश्नुते वचनात् संध्या | श्रीः २
चतुष्टयं साधकेनावश्यं कर्तव्यं इति संक्षेपः अत्र प्रमादाद्यदि संध्यालोपो भवति तदा त
मसंध्यासमये प्रोक्तप्रायश्चित्तपूर्वकं पूर्वसंध्याक्रियां विधाय तत्कालसंध्यां कुर्यात् ३ | १६

वृ
यदिहाविंशतिगुणिते
व्ययगतसैवतारैलसं
मिश्रं नतवेदाग्निसमे
तेश्राकस्ने पालंविज्ञे
निपात भूषिकाल
पुनश्चाकेकल्पाब्धमि
तिके च्यते कल्पाद्या
ब्दगणो दिवाकरग
णः वैशाखादिमासैर्युतः
त्रिस्थामूलभगास्य
युकसरहृतोलब्धादि
मासैर्युतः त्रिंशघ्नो दिनयुक् द्विधाशिवगुणः अभ्रागमक्तो ल्वितःकल्पादिरहर्गणो भवदिने तत्कार्धरात्रोद्भवः

शिवपूजां कृत्वा मंडपद्वारपूजां कुर्वीत ततः पार्थिवं सर्वसिद्धिदमित्यागमोक्तेः पार्थिवलिंगपूजनं प्रश
स्तं तत्पूजनप्रकारस्तु गोमयेनोपलिप्ते शुचौ देशे प्राक्सूर्यपूजोक्तविधिना स्वासने संपूज्य तत्रोद
मुख उपविश्य अद्येत्यादि तिथ्युल्लेखनांते श्रीपरदेवतार्चनाधिकारसिद्ध्यर्थं पार्थिवशिवलिंगपू
जनमहं करिष्य इति संकल्प्य हराय नम इति स्थविस्थानात्कुंभेन स्निग्धां मृदमादाय संशोध्य महेश्वरा
य नमः इति लिंगं संघट्टनं विधाय स्वपुरतः पीठादौ संस्थाप्य शिवपंचाक्षरमंत्रेण प्राणायामत्रयं कृ
त्वा शिरसि वामदेवऋषये नमः मुखे पंक्तिछंदसे नमः हृदये सदाशिवाय देवतायै नमः इति विन्यस्य
परदेवतार्चनाधिकारसिद्ध्यर्थे पार्थिवलिंगार्चने विनियोगः कृतांजलिर्दत्वा ॐ हृदयाय नमः नं
शिरसे स्वाहा नमः शिखायै वषट् शिकवचाय हुं वां नेत्राभ्यां वौषट् यः अस्त्राय फट् इति षडंगमं
त्रांगुष्ठादि करतलांतकरयोर्विन्यस्य हृदयादिषडंगेष्वपि विन्यस्य मृगाटकाभयवरं स्फुलं व्याघ्रा
जिनांबरं चंद्रचूडं त्रिनेत्रं च पंचवक्त्रं शिवं भजे इति ध्यात्वा मानसैः संपूज्य पित्वा वक्ष्यमाणा

ॐ सामान्यार्घ्यविधिना शिवार्घ्यं चात्र मंत्रेण च र्घपाद्यादिपात्राणि संस्थाप्य वक्ष्यमाणविधि ॥
14 नाशिवपीठं संपूज्य पुष्पांजलिमादाय हृदि तेजोरूपं ध्यात्वा ब्रह्मरन्ध्रमार्गेणा वहिर्निस्सार्य क
15 रस्थपुष्पांजलौ तत्तेजः संयोज्य पिनाकधृगिहागच्छागच्छेति तस्मिंल्लिंगे पुष्पांजलि ॥
क्षेपेणावाहय शूलपाणे इह तिष्ठ तिष्ठेति संस्थाप्य प्राग्युक्त षडंगन्यासयोगेन सकली
कृत्य पशुपतये नमः इत्यर्घ्यादिवस्त्रान्तानुपचारानुपचार्य शिवाय नमः इति गंधपुष्पानि
वेद्यवेद्यावामावर्त्तेन स्वाग्रमारभ्य ॐ शर्वाय क्षितिमूर्त्तये नमः ॐ भवाय जलमूर्त्तये न
मः ॐ रुद्रायाग्निमूर्त्तये नमः ॐ उग्राय वायुमूर्त्तये नमः ॐ भीमायाकाशमूर्त्तये न
मः ॐ पशुपतये यजमानमूर्त्तये नमः ॐ महादेवाय सोममूर्त्तये नमः ॐ ईशाना
य सूर्यमूर्त्तये नमः इति संपूज्य प्रणालिकायां ॐ उमायै नमः इति पूजयेत् ततः सां
बाय सपरिवाराय श्रीशिवाय नमः इति त्रिः संपूज्य शिवाय नमः इति धूपादिताम्बूलान्ता

न्युपचारं दत्वा पंचाक्षरमंत्रं यथाशक्ति जपित्वा जपसमर्प्य ॥ ओं सर्वज्ञज्ञानविज्ञानप्रदा
नैकमहात्मने नमस्ते देवदेवेश सर्वभूतहितेरत ॥ अनंतकीर्त्तिसंपन्न अनंता
त्मनहेस्थित अनंतकांतिसंपन्न परमेश नमोस्तु ते ॥ परापर परातीत उत्पत्ति
स्थितिकारक ॥ सर्वार्थसाधनोपाय विश्वेश्वर नमोस्तु ते ॥ स्वभावनिर्मलाभोगस
र्वव्याधिविनाशन योगियोगि महयोगि योगीश्वर नमोस्तु ते ॥ कृत्वा लिंगं प्र
तिष्ठान्तु स्तवमेनमुदीरयेत् ॥ लिंगस्तवं महापुण्यं यः ॥ शृणोति सदा
नरः ॥ नोत्पद्यते च संसारे स्थानं प्राप्नोति शाम्भवं ॥ तस्मात्सर्वप्रयत्नेन
पठेद्यालिंगसंस्तवं पापकंचुकनिर्मुक्तः प्राप्नोति परमं पदं ॥ इतिस्कु
तैकाग्र सर्वस्तोत्रमंत्रमिदं पठेत् ॥ अंगहीनं क्रियाहीनं विधिहीनं महेश्व
रः ॥ पूजितोसि मयादेव तत्क्षमस्व भवात्मकृत् ॥ यद्यपुष्पकृतैः पुष्पैर

ॐ यास्तैर्भीवद्धितैः ॥ केशकीटापविद्धैश्च पूजितोसि मया प्रभो अन्यथा सक्तचित्ते
१६ न क्रियाहीनेन वा प्रभो मनोवाःक्काययदुष्टेन पूजितोसि त्रिलोचन नाथ ज्ञोपहत
16 मात्रेण कृतमर्घ्यादिकं मयात्र मर्मेन च भावेन त्वत्समस्व मम प्रभो मंत्रेणात
रहीनेन पुष्पेण विकलेन च पूजितोसि महादेव तत्सर्वंतम्पतां मम ध्यात्वं।
सेहं गोत्तांया तु फलं चात्रयमस्तु ते इति पठित्वा प्रदक्षिणा नमस्कारैः सम्यक्
परितोष्य श्रीमहादेवं नमस्वेति स्वात्मनि संहारमुद्रया विसृज्य निर्माल्यमा-
दाय चंडीश्वराय नमः इति ईशानकोने निक्षिप्यते लिंगं निर्माल्यपुष्पादि
कं च जलमध्ये न घातो विसृजेत ॥ अत्र पार्थिवलिंग पूजायां पार्थिवलिंगं
यथा यथा हृहत्तथा तथा फलवाहुल्यं यथा यथा स्वल्पं तथा फलमल्पं-
स्वल्पोपि फलत्वाद्दुनेन कार्यमिति पार्थिवपूजनप्रकारः ॥ ॥ ॥